अभ्यास पत्र

विषय - संस्कृत
कक्षा - दशम

## खण्डः 'घ'

## पठित-अवबोधनम्

1 - **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

एकदा स्वातिनामकः मुनिः पिपासया पीडितोऽभवत्। जलमूलम् अन्विष्यता तेन कश्चन आह्लादकरः शब्दः श्रुतः। तम् अनुसृत्य स अग्रे गतः। तत्र कुत्रचित् पर्वतात् पतन्तः जलबिन्दवः शुष्कपर्णानाम् उपरि पतित्वा मधुरं सङ्गीतं जनयन्ति स्म। एतद् अवगत्य प्रेरितः सः तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगतवान्। सङ्गीतसाधनेषु प्रतिध्वनेः उत्पादनार्थं यः सूक्ष्मक्रमः आवश्यकः तम् अन्विष्टवान् सः। एवं यत् सङ्गीतसाधनं निर्मितवान् तस्य नाम 'मृदङ्ग' इति।

**प्रश्नाः**

**I. एकपदेन उत्तरत–**

(*i*) मुनिना कीदृशः शब्दः श्रुतः ?

(*ii*) मुनिः कया पीडितः आसीत् ?

**II. पूर्णवाक्येन उत्तरत–**

मुनिः किं विस्मृत्य वेगेन आश्रमम् आगतवान् ?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–**

(*i*) 'मधुरं सङ्गीतम्' अत्र विशेष्यपदं किम् ?

(क) मधुरम् (ख) सङ्गीतम्
(ग) जलमूलम् (घ) पतन्तः

(*ii*) 'सः अग्रे गतः' अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(क) प्रपाताय (ख) सङ्गीताय
(ग) मुनये (घ) मृदङ्गाय

2 - **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

का पाण्डुपत्नी गृहभूषणं के, को रामशत्रुः किमगस्त्यजन्म ?
सूर्यैक-पुत्रो वद वेत्सि चेत्त्वं कुन्ती-सुता-रावणकुम्भकर्णाः॥

**प्रश्नाः**

**I. एकपदेन उत्तरत–**

(*i*) गृहभूषणं के ?

(*ii*) रामशत्रुः कः आसीत् ?

**II. पूर्णवाक्येन उत्तरत–**

सूर्यैकपुत्रः कः ?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–**

(*i*) 'घटः' इत्यर्थे किं पदमत्र प्रयुक्तम् ?

(क) कुम्भकर्णः (ख) कुम्भः
(ग) रावणकुम्भः (घ) अगस्त्यः

(*ii*) 'वेत्सि' इति क्रियापदस्य कर्तृपदं किम् ?

(क) त्वम् (ख) वद
(ग) कुन्ती (घ) कः

3 - **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

**प्रथमः भिल्लः** – हा धिक् ! कीदृशः समय आगतः ? देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः।

**द्वितीयः भिल्लः** – न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम् ? हा निष्ठुर दैव! देशभक्ते तु दयस्व।

**तृतीयः भिल्लः** – वराकोऽयं जीवनसामग्रीयुद्धसामग्र्योः अभावेन खिद्यते। परमेश्वर! दयस्व! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः ? (सर्वे भिल्लाः विलपन्ति)

**एकः सैनिकः** – हा दैव! कथं देशधर्मौ प्रति निष्ठुरः सञ्जातोऽसि ? (प्रतापं प्रति) महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम्।

**सर्वे सैनिकाः** – परतन्त्रे देशे जीवनं नरकायते। न शक्नुमः प्राणान् धारयितुम्।

प्रश्नाः

I. एकपदेन उत्तरत–

(i) सैनिकाः कान् धारयितुम् न समर्थाः ?

(ii) कः निष्ठुरः जातः ?

II. पूर्णवाक्येन उत्तरत–

प्रतापः कयोः अभावेन खिद्यते ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–

(i) 'स्वतन्त्रे' इत्यस्य किं विपरीतार्थकं पदम् अत्र प्रयुक्तम् ?

(क) निष्ठुरः (ख) नरकायते

(ग) प्राणाम् (घ) परतन्त्रे

(ii) "न जाने अस्य भाग्ये किं लिखितम्।" अत्र 'अस्य' पदं कस्मै प्रयुक्तम् ?

(क) सैनिकाय (ख) भिल्लाय

(ग) प्रतापाय (घ) राजपुत्राय

4 – निम्नलिखितयोः श्लोकयोः अन्वयं मञ्जूषायाः समुचितं पदं चित्वा पूरयत–

(क) मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैः कुसुमानि भृङ्गैः।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात्।

**अन्वयः**–चन्दनपादपस्य (i) ________ भुजङ्गैः (आश्रितम्), शिखरम् प्लवङ्गैः, (ii) ________ विहङ्गैः (iii) ________ भृङ्गैः (आश्रितानि)। (चन्दनपादपस्य) तत् (अङ्गम्) न अस्ति एव यत् (iv) ________ सत्त्वभरैः (v) ________ आश्रितम्।

(ख) विश्वबन्धुत्वमुद्घोषयत्पावनं विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयत् भूतले भाति मेऽनारतं भारतम्।।

**अन्वयः**–पावनम् विश्वबन्धुत्वम् (i) ________ विश्ववन्द्यैः चरित्रैः जगत् (ii) ________ विश्वम् एकम् (iii) ________ समालोकयत् मे (iv) ________ भारतम् अनारतम् भाति।

| मञ्जूषा |
|---|
| शाखा, उद्घोषयत्, मूलम्, पावयत्, कुसुमानि, कुटुम्बम्, भूतले, न, भाति, समन्तात् |

5 – रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–

(i) मुनेः उपरि बलाका विष्ठाम् उद्सृजत्।

(ii) विस्मितः मुनिः ततः व्याधस्य समीपे गतः।

(iii) ब्राह्मणी भर्तुः परिचर्यां समाप्य गृहात् बहिगता।

(iv) 'नाहं बलाका' इति ब्राह्मण्या कथितम् श्रुत्वा मुनिः विस्मितः।

(v) अष्टावक्रः जनकस्य सभाम् अगच्छत्।

6 – अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत–

(i) मातुः आज्ञां लब्ध्वा सः जनकस्य सभाम् अगच्छत्।

(ii) पण्डितान् हसतः दृष्ट्वा अष्टावक्रः उच्चैः अहसत्।

(iii) जनकस्य सभां गतः तस्य पिता अति दीर्घकालात् न प्रत्यागच्छत्।

(iv) सर्वे पण्डिताः तस्य वक्रदेहं दृष्ट्वा उच्चैः अहसन्।

(v) वक्रदेहः अष्टावक्रः सर्वशास्त्रेषु पारङ्गतः अभवत्।

(vi) अष्टावक्रः पण्डितान् अपृच्छत्–"किं वक्रे देहे आत्मा अपि वक्रः भवति" ?

(vii) शास्त्रार्थं कृत्वा स्वज्ञानेन सः सर्वान् पण्डितान् अजयत्।

(viii) जनकः अष्टावक्राय राज्यम् अर्पयति।

(ix) राजा जनकः अष्टावक्रं स्वगुरुम् अमन्यत।

(x) अष्टावक्रः राज्यं न स्वीकरोति।

7 –

**अधोलिखितवाक्येषु रेखांकितपदानां कृते उचितम् अर्थं चित्वा लिखत–**

(*i*) नित्यं <u>धवलास्तरेषु</u> नृत्यामि।

(क) निर्मलेषु
(ख) स्वच्छ-प्रच्छदनेषु
(ग) श्वेतकर्गदपत्रेषु
(घ) धवलस्तम्भेषु

(*ii*) एवं पतिव्रतया सः मुनिः <u>अभिहितः</u>।

(क) प्रताडितः
(ख) उक्तः
(ग) दृष्टः
(घ) अधिक्षिप्तः

(*iii*) त्वम् <u>आशु</u> परं श्रेयं अवाप्स्यति।

(क) शीघ्रम्
(ख) ततः
(ग) तत्पश्चात्
(घ) स्वयम्

(*iv*) तौ हि मम <u>परायणम्</u>।

(क) धर्मः
(ख) चरित्रम्
(ग) शरणम्
(घ) कर्तव्यम्

(*v*) मदीयेन एव खड्गेन <u>जहि</u> माम्।

(क) गच्छ
(ख) मारय
(ग) जानीहि
(घ) कुरु